पाणिनीयशिक्षा

भाष्येण सहिता

काशीस्थराजकीयसंस्कृतपाठशालीयसांख्या-
ध्यापकश्रीबेचनरामत्रिपाठिना
परिशोधिता ।

व्रजभूषणदास और कम्पनी

चांदनीचौक के उत्तर नई सड़क
बनारस ।

Benares:

PRINTED AT THE BENARES PRINTING PRESS
BY CHHANNULAL.

1877.

Registered According to Act XXV. of 1867.

2082
N

CC-0 Pt. Chakradhar Joshi and Sons, Dev Prayag. Digitized by eGangotri

CC-0 Pt. Chakradhar Joshi and Sons, Dev Prayag. Digitized by eGangotri

॥ श्रीगणेशाय नमः ॥

अथ शिक्षां प्रवक्ष्यामि पाणिनीयं मतं यथा ।
शास्त्रानुपूर्व्यं* तद्विद्याद्यथोक्तं लोकवेदयोः ॥ १ ॥

पातु वो निकषग्रावा मतिहेम्नः सरस्वती ।
प्राज्ञेतरपरिच्छेदं वचसैव करोति या ॥ १ ॥
छन्दःकल्पनिरुक्तानि विवृतानीह सूरिभिः ।
शिक्षा न † विवृता यस्मात्तस्मात्तां विवृणोम्यहम् ॥ २ ॥

अथ शिक्षां प्रवक्ष्यामि । अथेत्ययमानन्तर्ये वेदाध्ययनस्यानन्तरमङ्गपाठः । किं कारणं षडङ्गवेदो ऽध्येतव्य इति स्मरणात् । तत्र च शिक्षा प्रथमा अथशब्दानुषङ्गात् सा च वक्तव्येत्यथशब्दस्यार्थः एतेनैव सिद्धे वेदस्याङ्गानन्तर्ये व्याकरणादिष्वथशब्दो ऽत एव नाधीयते । केषुचित् कल्पेषु अधीयत इति चेत् अथातोऽधिकारः । अथैतस्य समाम्नायस्येत्येवमादिषु नैष दोषः नियमार्थः सः, शिक्षानन्तरं कल्प एवाध्येतव्यो नान्यानीति । मङ्गलार्थो वा । आदौ संबन्धाभिधेयप्रयोजनानि वक्तव्यानि । तत्र चायमेव संबन्धो यदुक्तोऽङ्गाङ्गिभावः । नित्यसंबन्धो ह्यङ्गाङ्गिनः । अभिधेयं तु स्वयमेव वक्ष्यति । वाच उच्चारणे विधिमिति । प्रयोजनं सम्यग्वर्णोच्चारणम् । प्रयोजनमपि श्रूयतएव एको वर्णः सम्यक् प्रयुक्तः स्वर्गे लोके काम-

---

* शास्त्रानुपूर्वं—पाठः १ ।
† [illegible]

CC-0 Pt. Chakradhar Joshi and Sons, Dev Prayag. Digitized by eGangotri

प्रसिद्धमपि शब्दार्थमविज्ञातमबुद्धिभिः ।
पुनर्व्यक्तीकरिष्यामि वाच उच्चारणे विधिम् ॥ २ ॥

धुग्भवतीति । शिक्ष्यते ऽनया वर्णोच्चारणमिति शिक्षा तां प्रकर्षेण वक्ष्यामि कथयिष्यामि । पाणिनीयं मतं यथा पाणिनीयमिति वृद्धाच्छ इति छप्रत्ययः तस्येदमित्यर्थनिर्देशः मतमिति मनज्ञाने पाणिनीयं मतं ज्ञानं यथा तथा प्रवक्ष्यामि तैरेव प्रत्याहारैस्तयैव परिभाषया अचोऽस्पृष्टा यणस्त्वीषदित्यादि अणुदित्सवर्णस्य चाप्रत्यय इति च । कण्ठ्यावहाविचुयशा इति । तथान्यदप्यनुक्तमत्र प्रयोजनं यत्तद् व्याकरणादेव ग्रहीतव्यं मोऽनुस्वार इति । ननु व्याकरणे शब्दचिन्ताऽत्रापि सेति ततश्च व्याकरणेनैव सिद्धत्वादिदमनारभ्यम् । सत्यमुभयोः शब्दचिन्ता किं तु व्याकरणे एतच्चिन्त्यते गोशब्दः सास्नादिमत्यर्थे साधुः इह तु गोशब्दो जिह्वामूलेनोच्चारयितव्य इति भेदः । शास्त्रानुपूर्व्यं तद्विद्यादिति । शास्त्रमिति शासेः करणे ष्ट्रन् प्रत्ययः । आनुपूर्व्यमिति गुरुपूर्वक्रमः तदिति पाणिनिमतपरामर्शः पाणिनिमतस्य यदानुपूर्व्यं यो गुरुपूर्वक्रमः स एवास्येत्यर्थः । तथा च वक्ष्यति । शङ्करः शाङ्करीं प्रादादित्यादि । यथोक्तं लोकवेदयोरिति । समानार्थमित्यर्थः । तथा च भाष्यकारः "यएव लौकिकाः शब्दास्तएव वैदिकास्तएव तेषामर्थाः" इति ॥ १ ॥

नन्वकारादयो वर्णाः स्वस्थानेनैवोच्चार्यन्ते परस्थाननिराकाङ्क्षत्वात्किमर्थः शास्त्रारम्भ इत्याशङ्क्याह । प्रसिद्धमिति । अबुद्धिभिर्बुद्धिहीनैः प्रसिद्धम् अपि शब्दार्थमविज्ञातं सन्तं पुनः पश्चाद् व्यक्तीकरिष्यामि स्फुटीकरिष्यामि । वाच उच्चारणे विधिं वाचो गिर उच्चारणे उद्गिरणे विधिं विधानम् । ननु विधि[illegible] समर्थ्यते । न

CC-0 Pt. Chakradhar Joshi and Sons, Dev Prayag. Digitized by eGangotri

त्रिषष्टिश्चतुःषष्टिर्वा वर्णाः सम्भवतो* मताः ।
प्राकृते संस्कृते चापि स्वयं प्रोक्ताः स्वयंभुवा ॥ ३ ॥
स्वरा विंशतिरेकश्च स्पर्शानां पञ्चविंशतिः ।

चात्रात्यन्तमप्राप्तिः उक्तं च अधस्तादकारादयो वर्णाः स्वस्थानेनैवोच्चार्यन्ते इति । उच्यते । यद्यपि स्वस्थानस्थिता उच्चार्यन्ते तथाप्यप्राप्तोऽशः कथनीयोऽनुप्रदानादिः एतदर्थो विधिशब्दः ॥ २ ॥

वागुच्चारणं च वर्णैः क्रियते कति संख्यास्ते इत्यत आह ॥

त्रिषष्टिश्चतुःषष्टिर्वेति । सम्भवत इति सम्भूतेः सकाशान्मताः ज्ञाताः वर्णो वृणोतेः अत्र यथोक्तं लोकवेदयोरित्युक्तम् । तत्र किं लोके संस्कृतविषया एव वर्णा उत सर्वभाषाविषया इत्याह । प्राकृते संस्कृते चापीति । अपिशब्दादपभ्रंशादिष्वपि ये वर्णाः संभूतेर्जाताः सन्तः ते ऽपि । स्वयं प्रोक्ताः स्वयंभुवेति । ब्रह्मणा स्वयमेवादरेण प्रकर्षेणोच्चारिताः ॥ ३ ॥

कथं ते त्रिषष्टिः कथं वा चतुःषष्टिरित्याशङ्क्याह ॥

स्वरा विंशतिरेकश्चेति । स्वरा इति । स्वृशब्दोपतापयोः स्वर्यते शब्द्यते ऽनेन व्यञ्जनमिति करणे अच् प्रत्ययः । कथं ते एकविंशतिः ततश्चतुरो यथास्मृति विवृणोमि अ इ उ ऋ एते चत्वारो ह्रस्वदीर्घप्लुतभेदेन द्वादश । ऌकारस्य दीर्घादयो न सन्तीति स्मरणात् ह्रस्व एवोपदिश्यते ते एते त्रयोदश । ए ऐ ओ औ सन्ध्यक्षराणि सन्ध्यक्षराणामपि ह्रस्वा न सन्तीति स्मरणात् दीर्घप्लुता एव गृह्यन्ते ते एते ऽष्टौ । पूर्वैस्त्रयोदशभिः सहैकविंशतिः । स्पर्शानां पञ्चविंशतिः

CC-0 Pt. Chakradhar Joshi and Sons, Dev Prayag. Digitized by eGangotri

* शम्भुमत—पा० १ ।

यादयश्च स्मृता ह्यष्टौ चत्वारश्च यमाः स्मृताः ॥ ४ ॥
अनुस्वारो विसर्गश्च ᳵकᳶपौ चापि पराश्रयौ* ।

——

कादयो मावसानाः स्पर्शाः † जिह्वामूलतालुमूर्द्धदन्तोष्ठादिभिः परस्परं स्पर्शैरभिनिष्पन्ना आविर्भवन्तीति स्पर्शाः । पूर्वयैकविंशत्या सह षट्चत्वारिंशत् । यादयश्च स्मृता ह्यष्टाविति । यकारदयश्च अष्टौ यरलवशषसहा इति आद्याश्चत्वारोऽन्तस्थसञ्ज्ञाः उपरितना ऊष्माणः पूर्वैः षट्चत्वारिंशद्भिः सह चतुःपञ्चाशत् । चत्वारश्च यमाः स्मृता इति । यच्छन्तीति यमाः स्वयमेवोपरमेरन् के ते यमा लोके ‡ कुंखुंगुंघुं इति । "अनन्त्यान्त्यसंयोगे मध्ये यमः पूर्वगुण" इत्यौदव्रजिः । तथा च नारदः । "अनन्त्यश्च भवेत्पूर्वो अन्त्यश्च § परतो यदि । तत्र मध्ये यमस्तिष्ठेत् सवर्णः पूर्ववर्णयोः । वर्गान्त्यान् शषसैः सार्द्धमन्तस्थैर्वा ऽपि संयुतान् । दृष्ट्वा यमा निवर्तन्ते आदेशिकमिवाध्वगाः" इति । नारदौदव्रज्योर्मतेन यमो वर्णागम इति विधीयते । अस्मात् शास्त्रात् चत्वारश्च यमाः स्मृता इति । वर्णान्तरत्वेनोपदेशः संयोगशास्त्रात् अथ चतुरक्षराणामुदाहरणमिति प्रकृत्य अग्निरिति यमौ गकारौ द्वौ नकार इकारश्चेति । अन्ये तु यमं वर्णायन्तिं मन्यन्ते । तथा च शौनकः । "स्पर्शा यमाननुनासिकान् स्वापरेषु स्पर्शेष्वनुनासिकेष्विति" । पूर्वैश्चतुःपञ्चाशद्भिः सहाष्टपञ्चाशत् ॥ ४ ॥

अनुस्वारो विसर्गश्चेति । स्वरमनुभवतीत्यनुस्वारः अन्वक्षारानुगमनेनानुस्वारः वक्ष्यति च दन्तमूल्यः स्वरानुग इति । विसर्ग इति ।

---

* पराश्रितौ—पा० ।
† स्पर्शा इति १ नास्ति ।
‡ यमालोके इति १ नास्ति ।
§ [illegible]—पा० ।

CC-0 Pt. Chakradhar Joshi and Sons, Dev Prayag. Digitized by eGangotri

संस्कृत

दुःस्पृष्टश्चेति विज्ञेयो ऌकारः प्लुत एव च ॥ ५ ॥

विविधं सृज्यते क्षिप्यते इति विसर्गः । ≍क≍पौ चापि पराश्रयौ पराश्रयाविति परौ ककारपकारौ आश्रयः स्थानं ययोस्तौ पराश्रयौ । तथा च वक्ष्यति । अयोगवाहा विज्ञेया आश्रयस्थानभाजिन * इति । अपरः पाठः कपावपि परौ स्मृतौ । ≍कःपौ चापि परौ स्मृतौ । अनुस्वारविसर्गयोः परावित्यर्थः । अपरोपि पाठः ≍कःपौ चापि कपाश्रयौ ककारपकारौ तौ आश्रयः स्थानं ययोस्तौ कपाश्रयौ । चशब्दादनुस्वारविसर्जनीयाविति पराश्रयौ दुस्पृष्टश्चेतीति । ईषत्स्पृष्टो वर्णाधमो न वर्णान्तरम् । वक्ष्यति च । अचोऽस्पृष्टा यणस्त्वीषदित्यादि । तथा चौदव्रजिः । स्पृष्टं करणं स्पर्शानाम् । दुस्पृष्टमन्तस्थानामिति यण् भक्ति च यकारोऽभिधत्ते । अतो ऌकारो दुःस्पृष्टधर्मा । चशब्दात् ऋकारश्च । इतिशब्दः पादपूरणार्थः । ऌकार इति । ऌवर्णात् कारप्रत्ययः । प्लुत एव चेति । ऌकारस्य दीर्घादयो न सन्तीत्यधस्तात् परमतमुपन्यस्तं, स्वमतं चाह । ऌकारः प्लुत एव चेति त्रिमात्रः चशब्दाद्ध्रस्वश्च । ननु वर्णानां प्रयत्नमुपरिष्टाद्वक्ष्यत्येव किमर्थमप्रस्तुतः प्रयत्नः कथ्यते । उच्यते । प्लुतविधानार्थं तावद्लृकार उच्चारयितव्यः उच्चारिते च ऌकारे लाघवार्थमप्रस्तुतोऽपि प्रयत्न उच्चारितः । दुःस्पृष्टश्चेति । अनुस्वारादयः प्लुतान्ताः पञ्च । पूर्वैरष्टपञ्चाशद्भिः सह त्रिषष्टिः चतुःषष्टिः । कथम् । अनुस्वारौ विसर्गश्चेतिपाठान्तरात्, कथं पुनरनुस्वारद्वयं ह्रस्वदीर्घभेदेनेति ब्रूमः । तथा चौदव्रजिः । "अनुस्वारावंआं इत्यनुस्वारौ ह्रस्वदीर्घौ दीर्घाद्ध्रस्वो वर्ण" इति । अत एव चतुःषष्टिः ॥ ६ ॥

---

*भाष्यम्—पा० १।

CC-0 Pt. Chakradhar Joshi and Sons, Dev Prayag. Digitized by eGangotri

आत्मा बुद्ध्या समर्थ्यार्थान्* मनो युङ्क्ते विवक्षया ।
मनः कायाग्निमाहन्ति स प्रेरयति मारुतम् ॥ ६ ॥

अथ वर्णसंख्यापरिज्ञानोत्तरकालं चिन्त्यते । क एषामुच्चारयिता कथं चोच्चारयति केन क्रमेण चेत्याह ॥

आत्मेति । आत्मा शरीरेन्द्रियमनोबुद्धिव्यतिरिक्तः कथं पुनरेतदवगम्यते । यथा शरीरेन्द्रियमनोबुद्धिव्यतिरिक्त आत्मा उच्यते । द्रष्टृत्वात् । द्रष्टा हि दृश्याद् व्यतिरिक्तो भवति प्रयोजकत्वात् । बुद्ध्यादीनि कर्तृप्रयोज्यानि करणत्वात् कुठारवत् इति न्यायात् । श्रुतेश्च न्यायस्तावत् । अग्निहोत्रं जुहुयात् स्वर्गकाम इति । स्वर्गादिफलसाधनानि कर्माणि श्रूयन्ते । स्वर्गश्च नवशरीरोपभोग्यः तद्व्यातिरिक्त आत्मा शरीरादिः । श्रुतेश्च तस्य हैतस्य हृदयस्याग्रं प्रद्योतते तेन प्रद्योतते नैष आत्मा निष्क्रामति चक्षुषो वा मूर्ध्नो वा ऽन्येभ्यो वा शरीरदेशेभ्य इति । शरीरापक्रमणाच्च शरीरादिव्यतिरिक्त आत्मा । छान्दोग्यश्रुतेश्च एवमेवैष संप्रसादो ऽस्माच्छरीरात्समुत्थाय परं ज्योतिरूपं संपद्य स्वेन रूपेणाभिनिष्पद्यतइति । कएषामुच्चारयितेति पृष्टे तस्योत्तरं दत्तमात्मेति । कथमुच्चारयति केन क्रमेणेति प्रश्नद्वयस्योत्तरं दीयते । स आत्मा बुद्ध्या सहार्थान् बाह्यान् समर्थ्य सम्यगवगम्यार्थप्रत्यायनाय यदि शब्दा उच्चार्यन्ते तदा मनो युङ्क्ते विवक्षया वक्तुमिच्छया तच्च मनो युङ्क्ते आत्मा । मनः कायाग्निमाहन्तीति । तच्च मनो नियुक्तं सत् कायाग्निमाहन्ति कायाग्निमशरीराग्निम् आभिमुख्येनाहन्ति स प्रेरयति मारुतमिति । सोऽग्निरभिहतः सन्मारुतं

---

* समेत्यार्थान्—पा० १ ।

CC-0 Pt. Chakradhar Joshi and Sons, Dev Prayag. Digitized by eGangotri

मारुतस्तूरसि चरन्मन्द्रं जनयति स्वरम् ।
प्रातःसवनयोगं तं छन्दो गायत्रमाश्रितम् ॥ ७ ॥
कण्ठे माध्यन्दिनयुगं मध्यमं त्रैष्टुभानुगम् ।
तारं तार्तीयसवनं शीर्षण्यं जागतानुगम् ॥ ८ ॥
सोदीर्णो मूर्ध्न्यभिहतो वक्त्रमापद्य मारुतः ।

वायुं प्रेरयति ॥ ६ ॥

मारुतस्तूरसि चरन्मन्द्रं जनयति स्वरमिति । वायुरुरसि चरन्मन्द्रं स्वरमुत्पादयति । मन्द्रमिति मदे रक् प्रत्ययः । प्रातस्सवनयोगमिति । प्रातः सवनेन सह योगो ऽस्येति प्रातःसवनयोगः तं तथा च सुयज्ञः मन्द्रया वाचा प्रातःसवनमिति । गायत्रं छन्दोऽस्याश्रयः गायत्रं गायतेः आच्छादयति छन्दः * ॥ ७ ॥

कण्ठइति । मारुत इति वर्तते सवनं छन्दः स्वरं चरन्निति च वर्णान् जनयतीति यावत् । कण्ठे चरन्वायुर्मध्यमं स्वरं जनयति कण्ठे इति करणे ष्ठ इति ठप्रत्ययः मध्यं दिनं युनक्तीति माध्यन्दिनं सवनभाजं त्रिष्टुप्छन्दोऽनुगामिनम् । तारमिति । तार्तीयसवनभाजमिति तृतीयसवनभाजं तारं स्वरं मूर्द्धनि चरन् वायुर्जनयत्युत्पादयति जागतं छन्दोऽनुगामिनम् । जागतं छन्दोऽनुगच्छतीति जागतानुगः । शीर्षण्यमिति शीर्षश्छन्दसीति शिरःशब्दस्य शीर्षभावः तत्र भवं शीर्षण्यम् ॥ ८ ॥

सोदीर्ण इति । स वायुरुदीर्ण ऊर्ध्वगतो मूर्द्धानं यावदुपरितनां गतिमलभमानः शिरःकपालेनावष्टब्धत्वात्पुनः प्रत्यावृत्य वक्त्रमेवापद्य

---

* अच्छादनाच्छन्दः—पा० ३ ।

CC-0 Pt. Chakradhar Joshi and Sons, Dev Prayag. Digitized by eGangotri

वर्णाञ्जनयते तेषां विभागः पञ्चधा स्मृतः ॥ ९ ॥
स्वरतः कालतः स्थानात् प्रयत्नानुप्रदानतः ।
इति वर्णविदः प्राहुर्निपुणं तं निबोधत ॥ १० ॥

वर्णाञ्जनयति उत्पादयति पुनर्मारुतग्रहणं विस्पष्टार्थम् । तेषां विभागः पञ्चधा स्मृत इति । तेषां वर्णानां जन्यमानानां* विभागो विवेकः पञ्चधा पञ्चप्रकारः संख्याया विधार्थे धेति धा । स्मृतोऽनुगतः ॥ ९ ॥

कैर्हेतुभिस्तेषां वर्णानां पञ्चधा विवेक इत्याह ॥

स्वरतः इति । स्वरस्थाने हेतून् व्याख्यास्यामः । इतीति । वर्णानां ज्ञातार एवमाहुः पञ्चधा विवेको वर्णानामिति । पञ्चधा विवेकं वर्णानां निपुणमुच्यमानं हे श्रोतारः निबोधत शृणुत ॥ १० ॥

अत्र किंचिदुच्यते बालव्युत्पत्त्यर्थम् । ननु सर्वमेवैतदनुपपन्नं कथम् आत्मा बुद्ध्या समर्थ्यार्थान्मनो युङ्क्ते विवक्षयेति आत्मा बुद्ध्या सहार्थान् समर्थ्य मनो युङ्क्त इति व्याख्यातम् आत्मनश्च नियोजकभावो नोपपद्यते अकर्तृरूपत्वात्तस्य । तथा च श्रुतिः । "असङ्गो ह्ययं पुरुष इति । अस्थूलमनण्वह्रस्वमि"त्यादिका च । भवता चैवमात्मस्वरूपं व्याख्यातम् । आत्मनश्च नियोजकभावे शरीरेन्द्रियमनोबुद्धिव्यतिरिक्त इति शरीरादिव्यतिरिक्त आत्मा मनो युङ्क्त इत्यनुपपन्नम् । उच्यते । अयमात्मा समर्थ्यार्थान्मनो युङ्क्त इत्येतत् क्षेत्रज्ञाभिप्रायम् । क्षेत्रज्ञस्यैतदेव स्वरूपं यन्नियोजकत्वम् । तथा च मनुः । "योऽस्यात्मनः कारयिता तं क्षेत्रज्ञं प्रचक्षते । यः करोति तु कर्माणि स भूतात्मोच्यते बुधैः । जीवसञ्ज्ञोऽन्तरात्मान्यः सहजः सर्व-

---

* जन्यमानानां १ नास्ति ।

CC-0 Pt. Chakradhar Joshi and Sons, Dev Prayag. Digitized by eGangotri

उदात्तस्यानुदात्तस्य स्वरितस्य स्वराश्रयः ।

देहिनाम् । येन वेदयते सर्वं सुखं दुःखं च कर्मसु * । तावुभौ भूतसंपृक्तौ † महाक्षेत्रज्ञ एव च । उच्चावचेषु भूतेषु स्थितं तं व्याप्य तिष्ठति" ‡ इति । तं व्याप्येति परमात्मानमाहुः । तथा च व्यासः । "द्वाविमौ पुरुषौ लोके क्षरश्चाक्षर एव च । क्षरः सर्वाणि भूतानि कूटस्थो ऽक्षर उच्यते । उत्तमः पुरुषस्त्वन्यः परमात्मेत्युदाहृतः । यो लोकत्रयमाविश्य§ विभर्त्यव्यय ईश्वरः" । ननु यद्यात्मा बुद्ध्या समर्थ्यार्थानित्युदाहृतो यो नित्यः क्षेत्रज्ञ एवात्रात्माभिप्रेतो भवेत् ततः क्षेत्रज्ञ एवात्मशब्दस्य चरितार्थत्वात् शरीरेन्द्रियमनोबुद्धिव्यतिरिक्तत्वं कतरस्माच्छब्दात् त्वया वर्णितं किमर्थं चोच्यते आत्मा बुद्ध्येत्यत्र द्वावप्यात्मानौ तौ क्षेत्रज्ञपरमात्माभिधेयरूपावभिप्रेतौ तन्त्रेणोच्चारितौ तन्त्रेणोच्चारणं सूत्राणामलङ्कारः । एवं चेत् किमर्थं परमात्मनो वर्णनिमित्तत्वं यदुक्तं, तत्रोच्यते । अपवर्गसाधनोपकारत्वाच्छिक्षायाः । अपवर्गस्य चायमेवोपायः शरीरादिव्यतिरिक्तस्य परमात्मनो बोधः अनवबोधस्य तु बुद्ध्यादिभिरैक्यं भवति किं तदपवर्गसाधनं यस्य शिक्षोपकारे वर्तते । उच्यते । वेदा यज्ञाश्च । तथा च श्रुतिः "तमेतं वेदानुवचनेन विविदिषन्ति ब्रह्मचर्येण तपसा श्रद्धया यज्ञेनानाशकेन चेति" वेदानुवचनं । यज्ञगतमन्त्राङ्गत्वात्सम्यग्वर्णोच्चारणेन यस्मान्मोक्षमाप्नोति वक्ष्यति च सुखमतुलं च समश्नुतइति । अतुलं सुखं मोक्ष एव भवति ॥

---

* जन्मसु—पा० २ ।

† सृष्ट्युक्तौ—पा० २ ।

‡ व्याप्याधितिष्ठति—पा० २ ।

§ बिभ्र—पा० २ ।

CC-0 Pt. Chakradhar Joshi and Sons, Dev Prayag. Digitized by eGangotri

ह्रस्वो दीर्घः प्लुत इति कालतो नियमा अचि ॥ ११ ॥
उदात्ते निषादगान्धारावनुदात्तऋषभधैवतौ ।
स्वरितप्रभवा ह्येते षड्जमध्यमपञ्चमाः ॥ १२ ॥
अष्टौ स्थानानि वर्णानामुरः कण्ठः शिरस्तथा ।
जिह्वामूलं च दन्ताश्च नासिकोष्ठौ च तालु च ॥ १३ ॥
ओभावश्च विवृत्तिश्च शषसा रेफ एव च ।

अलमतिप्रसङ्गेन प्रकृतमनुसरामः ॥

उदात्तश्चानुदात्तश्चेति । स्वरतः कालत इत्येतौ द्वौ हेतू श्लोके विवृणोति स्वर उदात्तादिः कालो मात्राप्रभृतित्रिमात्रपर्यन्तः । उदात्त इत्युपरिष्टात् परिगृहीतः अनुदात्तस्तद्विपरीतः अधस्ताद्गृहीत इत्यर्थः । स्वरित इति । न स्वरान्तरं स्वरतीति स्वरितः आक्षेपनिष्पाद्यः य उदात्तानुदात्तविकारः । तथा च नारदः । "उच्चादुच्चतरं नास्ति नीचान्नीचतरं तथा । त्रैस्वर्ये स्वरसंज्ञायां किं स्थानं स्वर उच्यते । उच्चनीचस्थयोर्मध्ये साधारण इति श्रुतिः । तं स्वरं स्वरसंज्ञायां प्रतिजानन्ति शैक्षिकाः" । स्वरास्त्रय इति । त्रय एव ऋग्यजुर्विषयाः पञ्च सप्त च सामसु । ह्रस्व एकमात्रो दीर्घो द्विमात्रः प्लुतस्त्रिमात्रः । "निमेषकाला मात्रा स्या"दित्यौदव्रजिः । तथा च नारदः । "निमेषकाला मात्रा स्याद्विद्युत्कालेति चापरे" इति । इतिशब्दः प्रकारार्थः अनेन प्रकारेण कालतः हेतोः स्वरतश्च विषयभागनियमः । तथा च नारदः । "स्वर उच्चः स्वरो नीचः स्वरः स्वरित एव च । व्यञ्जनान्यनुवर्तन्ते यत्र तिष्ठति सुस्वरः" इति ॥ ११ ॥

CC-0 Pt. Chakradhar Joshi and Sons, Dev Prayag. Digitized by eGangotri

जिह्वामूलमुपध्मा च गतिरष्टविधोष्मणः ॥ १४ ॥
यद्योभावप्रसन्धानमुकारादिपरं पदम् ।
स्वरान्तं तादृशं विद्याद्यदन्यद् व्यक्तमूष्मणः ॥ १५ ॥
हकारं पञ्चमैर्युक्तमन्तस्थाभिश्च संयुतम् ।
औरस्यं तं विजानीयात् कण्ठ्यमाहुरसंयुतम् ॥ १६ ॥
कण्ठ्यावहाविचुयशास्तालव्या ओष्ठजावुपू ।
स्युर्मूर्धन्या ऋटुरषा दन्त्या ऌतुलसाः स्मृताः ॥ १७ ॥
जिह्वामूले तु कुः प्रोक्तो दन्त्योष्ठ्यो वः स्मृतो बुधैः ।

स्थानत इति यदुक्तं तदाह ॥

कण्ठ्यावहाविति । स्थानं कण्ठ्यादि कण्ठ्यावहाविति अकारहकारौ-कण्ठवहौ कण्ठतो* जातौ इचुयशाः तालव्याः इकारश्च चवर्गश्च यकारशकारौ च एते तालव्याः तालुस्थाने भवाः चु इत्युकारानुबन्धो वर्गं ज्ञापयति वर्गादावन्यत्रापि कुचुटुतुपु इत्येवमादिषु । तथा च पाणिनिः । अणुदित् सवर्णस्य चाप्रत्यय इति । औदव्रजिरपि "स्पर्शवर्गस्य स्पर्शग्रहणे च ज्ञेयम् । वर्गस्य ग्रहणं स्थानेष्वित्यधिकार" इति । ओष्ठजावुपू ऊकारः पवर्गश्च ओष्ठयोर्जातौ । स्युर्मूर्धन्या ऋटुरषा इति । ऋकारः टवर्गश्च रेफषकारौ च मूर्द्धन्या भवेयुः । दन्त्या ऌतुलसा इति । ऌकारस्तवर्गश्च लकारसकारौ च दन्तेषु भवाः ॥ १७ ॥

जिह्वामूले इति । कवर्गस्तु जिह्वामूले कथितः । दन्त्योष्ठ्यो वः स्मृतो बुधैरिति । वकारो दन्त्योष्ठ्ययोर्भवतीति पण्डितैः स्मर्यते ए ऐ

---

* कण्ठौ — पा० १ ।

CC-0 Pt. Chakradhar Joshi and Sons, Dev Prayag. Digitized by eGangotri

ए ऐ तु कण्ठ्यतालव्या ओ औ कण्ठोष्ठजौ स्मृतौ ॥ १८ ॥
अर्धमात्रा तु कण्ठ्यस्य ऐकारौकारयो*र्भवेत् ।
ओकारौकारयोर्मात्रा तयोर्विवृतसंवृतम् ॥ १९ ॥
संवृतं मात्रिकं ज्ञेयं विवृतं तु द्विमात्रिकम् ।
घोषा वा संवृताः सर्वे अघोषा विवृताः स्मृताः ॥ २० ॥
स्वराणामूष्मणां चैव विवृतं करणं स्मृतम् ।
तेभ्योऽपि विवृतावेङौ ताभ्यामैचौ तथैव च ॥ २१ ॥
अनुस्वारयमानां च नासिका स्थानमुच्यते ।
अयोगवाहा विज्ञेया आश्रयस्थानभागिनः † ॥ २२ ॥

तु कण्ठतालव्यौ इति । एकार ऐकारश्च कण्ठतालुतो जातौ । ओ औ कण्ठोष्ठजौ स्मृताविति । ओकारश्चौकारश्च कण्ठोष्ठयोर्जातौ ॥ १८ ॥

अर्द्धमात्रा इति । अर्द्धमात्रा तु कण्ठ्यस्य भवति कयोः एकारस्योकारस्य च सवर्णग्राहकत्वादैकारश्च औकारश्च द्वावपि गृह्येते अतश्चतुर्णामपि सन्ध्यक्षराणामर्द्धमात्रा कण्ठ्यसंबन्धिनी भवेत् अध्यर्द्धास्ताल्वोष्ठस्थानाः ॥ १९ ॥ २० ॥ २१ ॥

अयोगेति । अयोगवाहा इत्यनुस्वारादयश्चत्वार उच्यन्ते । अनुस्वारो विसर्गश्च ≍कप्पौ ‡ च कण्ठ्यौ । तथा च औदव्रजिः । "अयोगवाहा अः इति विसर्जनीयः ≍क इति जिह्वामूलीयः ≍प-≍फ इत्युपपध्मानीयः अं इत्यनुस्वारः नासिक्यः न विद्यते योगः सं-

---

* कण्ठ्या स्यादेकरैकारयो—पा० ।
† भाजिनः—पा० १ ।
‡ ≍क≍पौ—पा० १ ।

CC-0 Pt. Chakradhar Joshi and Sons, Dev Prayag. Digitized by eGangotri

अलाबुवीणानिर्घोषो दन्तमूल्यः स्वरानुगः* ।
अनुस्वारस्तु कर्तव्यो नित्यं ह्रोः शषसेषु च ॥ २३ ॥
अनुस्वारे विवृत्यां तु विरामे चाक्षरद्वये ।
द्विरोष्ठ्यौ तु विगृह्णीयाद् यत्रौकारवकारयोः ॥ २४ ॥
व्याघ्री यथा हरेत् पुत्रान् दंष्ट्राभ्यां न च पीडयेत् ।
भीता पतनभेदाभ्यां तद्वद्वर्णान् प्रयोजयेत् ॥ २५ ॥
यथा सौराष्ट्रिका नारी तक्राँ इत्यभिभाषते ।

योगो वर्णान्तरेण येषां ते अयोगवाहा इत्ययोगवाहाः आश्रयस्थानभाजिन इति । आश्रयस्य ककारादेः स्थानं भाजितुं शीलं येषां ते आश्रयस्थानभाजिनः अन्ये तु यमानप्ययोगवाहान्मन्यन्ते तेषां मतेन अयोगवाहशब्दः प्रत्यस्तमितावयवो रूढिशब्दोऽश्ववर्णवद्वेदितव्यः अनुस्वारस्य स्वरूपमाह । अनुस्वारस्य प्रकृतिः पाणिनिनैव कथिता मोनुस्वार इति ॥ २२ ॥

अलब्विति । अलाबु तुम्बः अलाबुयुक्तवीणाया निर्घोष इव शब्दो यस्य सोऽलाबुवीणानिर्घोषः । स्थानं दन्तमूलं तत्र भवो दन्त्यमूल्यः स्वरान् अकारादीन् अनुभवतीति स्वरानुगः । हकाररेफयोः शषसेषु सदा भवति । तथा च नारदः । "आपद्यते मकारो रेफोष्मसु प्रत्ययेष्वनुस्वारम् । यवलेषु परसवर्णं स्पर्शेषु चोत्तमापत्तिमि"ति । 'अष्टौ स्थानानि वर्णानामुरः कण्ठः शिरस्तथा । जिह्वामूलं च दन्ताश्च नासिकोष्ठौ च तालु चेति' । इमं श्लोकमनुवादरूपं केचित् पठन्ति ॥ २३ ॥

---

*नमु—पा० ।

CC-0 Pt. Chakradhar Joshi and Sons, Dev Prayag. Digitized by eGangotri

एवं रङ्गाः प्रयोक्तव्याः खेऽराँ इव खेदया ॥ २६ ॥
रङ्गवर्णान् प्रयुञ्जीरन् नोग्रसेत् पूर्वमक्षरम् ।
दीर्घस्वरं प्रयुञ्जीयात् पश्चान्नासिक्यमाचरेत् ॥ २७ ॥
हृदये चैकमात्रस्तु अर्द्धमात्रस्तु मूर्द्धनि ।
नासिकायां तथार्द्धं च रङ्गस्यैवं द्विमात्रिता ॥ २८ ॥
हृदयादुत्करे तिष्ठन् कांस्येन समनुस्वरन् ।
मार्दवं च द्विमात्रं च घन्वाँ २ इति निदर्शनम् ॥ २९ ॥
मध्ये तु कम्पयेत् कम्पमुभौ पार्श्वौ समौ भवेत् ।
स रङ्गं कम्पयेत् कम्पं रथीवेति निदर्शनम् ॥ ३० ॥
एवं वर्णाः प्रयोक्तव्या नाव्यक्ता न च पीडिताः ।
सम्यग्वर्णप्रयोगेण ब्रह्मलोके महीयते ॥ ३१ ॥
गीती शीघ्री शिरःकम्पी तथा लिखितपाठकः ।
अनर्थज्ञोऽल्पकण्ठश्च षडेते पाठकाधमाः ॥ ३२ ॥
माधुर्यमक्षरव्यक्तिः पदच्छेदस्तु सुस्वरः ।
धैर्यं लयसमर्थं च षडेते पाठका गुणाः ॥ ३३ ॥
शङ्कितं भीतमुद्घुष्टमव्यक्तमनुनासिकम् ।
काकस्वरं शिरसिगं तथा स्थानविवर्जितम् ॥ ३४ ॥
उपांशुदष्टं त्वरितं निरस्तं

---

२४ ॥ २५ ॥ २६ ॥ २७ ॥ २८ ॥ २९ ॥ ३० ॥ ३१ ॥

CC-0 Pt. Chakradhar Joshi and Sons, Dev Prayag. Digitized by eGangotri

व्याकरण
द.११४

विलम्बितं गद्गदितं प्रगीतम् ।
निष्पीडितं ग्रस्तपदाक्षरं च
वदेन्न दीनं न तु सानुनास्यम् ॥ ३५ ॥

प्रातः पठेन्नित्यमुरःस्थितेन
स्वरेण शार्दूलरुतोपमेन ।
माध्यंदिने कण्ठगतेन चैव
चक्राङ्कसंकूजितसन्निभेन ॥ ३६ ॥

तारं तु विद्यात् सवनं तृतीयं
शिरोगतं तच्च सदा प्रयोज्यम् ।
मयूरहंसाम्बुभृतस्वराणां
तुल्येन नादेन शिरःस्थितेन ॥ ३७ ॥

अचोऽस्पृष्टा यणस्त्वीषन्नेमस्पृष्टाः शरः स्मृताः ।
शेषाः स्पृष्टा हलः प्रोक्ता निबोधानुप्रदानतः ॥ ३८ ॥

———

स्वरतः कालतः स्थानतो वर्णानां भेदः कथितः अधुना । प्रयत्नतो भेदः कथ्यते प्रकर्षेण यत्नो वर्णोच्चारणं प्रत्यस्पृष्टादिभिः स प्रयत्नः ॥

अजिति । अजिति प्रत्याहारग्रहणं अ इ उ ऋ ऌ ए ऐ ओ औ एते अस्पृष्टाः । यणः यरलवाः एते ईषत्स्पृष्टाः शरिति प्रत्याहारग्रहणम् शषस एते नेमस्पृष्टाः । अर्द्धस्पृष्टा इत्यर्थः । शरस्तथा तथेति पादपूरणार्थः । शेषाः स्पृष्टा हलः प्रोक्ता इति । हल इति प्रत्याहारग्रहणं [illegible] शेषा इत्यस्य [illegible] शेषः यणः

CC-0 Pt. Chakradhar Joshi and Sons, Dev Prayag. Digitized by eGangotri

ञमोऽनुनासिका न ह्रौ नादिनो हझषः स्मृताः ।
ईषन्नादा यणजश्च* श्वासिनश्च खफादयः ॥ ३९ ॥

शरश्च ईषत्स्पृष्टास्तद्वर्जिताः हलः स्पृष्टाः स्वस्थानैः कथिताः । निर्घोषानुप्रदानत इति । अनुप्रदानमिति स्वस्थानादिकं घोषादि अनुप्रकर्षेण दीयते इति अनुप्रदानम् "द्वौ नादानुप्रदानौ" इत्यौदव्रजिः ॥ ३८ ॥

अनुप्रदानतो हेतोः वर्णानां भेदं शृणु । ञमिति प्रत्याहारग्रहणं ञ म ङ ण न म् अनुनासिका इति स्वस्थानैरधिकाराः अनुपाठात् नासिकामनुभवतीत्यनुनासिकः ञ म ङ ण न मोऽनुनासिकानिमान् जानीयात् तथा च पाणिनिः । मुखनासिकावचनो ऽनुनासिकः । अह्रौ इति अकारो रेफश्च हकारो झषश्च प्रत्याहारग्रहणं झष् झभघढधष् एते अह्रादयो नादिनः स्मर्यन्ते । नाद एषामस्तीति नादिनः । अपरः पाठः अमोऽनुनासिका नह्रौ अम इति प्रत्याहारग्रहणम् अ इ उ ण् ऋ ऌ क् ए ओ ङ् ऐ औ च् ह य व र ट् ल ण् ञ म ङ ण न म् एते अनुनासिकाः न ह्रौ न तु रेफहकारौ अमावपि सन्तौ नादिनो हझषः स्मृताः हकारो झषश्च नादिनः झषः झभघढधषः अस्यार्थे पाठद्वयात् अमां हकाररेफवर्जितानां विकल्पेनानुसिकत्वम्, ञमां तु नित्यम् । तथा च शौनकः । "सचादयो या विहिता विवृत्तयः प्लुतोपधान्ता अनुनासिकोपधा" इति । तथा उकारश्चेति करणे युक्तः पृक्तो द्राघितः शाकलेनेति अकाररेफयोः प्रथमे पाठे नादित्वं द्वितीयपाठे हकाररेफयोर्नासिकत्वप्रतिषेधः ईषन्नादा

---

* यणश्चैव—पा० १ ।

† ई[illegible]—पा० २ ।

CC-0 Pt. Chakradhar Joshi and Sons, Dev Prayag. Digitized by eGangotri

ईषच्छ्रासांश्वरो विद्याद्गोर्धामैतत् प्रचक्षते ।
दाक्षीपुत्रपाणिनिना येनेदं व्यापितं भुवि ॥ ४० ॥
छन्दः पादौ तु वेदस्य हस्तौ कल्पोऽथ पठ्यते ।
ज्योतिषामयनं चक्षुर्निरुक्तं श्रोत्रमुच्यते ॥ ४१ ॥
शिक्षा घ्राणं तु वेदस्य मुखं व्याकरणं स्मृतम् ।
तस्मात् साङ्गमधीत्यैव ब्रह्मलोके महीयते ॥ ४२ ॥
उदात्तमाख्याति वृषोऽङ्गुलीनां
प्रदेशिनीमूलनिविष्टमूर्द्धा ।
उपान्त्यमध्ये स्वरितं द्रुतं च
कनिष्ठिकायामनुदात्तमेव ॥ ४३ ॥
उदात्तं प्रदेशिनीं विद्यात् प्रचयं मध्यतोऽङ्गुलिम् ।
निहतं तु कनिष्ठिक्यां स्वरितोपकनिष्ठिकाम् ॥ ४४ ॥

यण्जशस्त्विति । यणः कथिताः जशस्तु जकाराद्याः शकारेण प्रत्याहारः ज ब ग ड द श् एते यण् जशश्च ईषन्मनाक् नादाः श्वासिनस्तु खफादय इति । खफादय इति खफछठथाः एते श्वासिनः श्वास एषामस्तीति श्वासिनः "श्वासो घोषाणां तृतीयात् प्रथमानामघोषाश्चतुर्थानायुग्माः सोष्माणमिति" चौदव्रजिः ॥ ३९ ॥

ईषच्छ्वासांश्वरो विद्यादिति । चर इति प्रत्याहारग्रहणम्, च ट त व् क प य् श ष स र् एतन्नामकान् ईषच्छ्वासान् जानीयात् । गोर्द्धामैतत्प्रचक्षतइति गोर्वाचः धाम स्थानं एतच्छास्त्रमाचक्षते वर्णविदः शास्त्रचतुर्मिति [illegible] ॥ ४० ॥ ४१ ॥ ४२ ॥ ४३ ॥ ४४ ॥

CC-0 Pt. Chakradhar Joshi and Sons, Dev Prayag. Digitized by eGangotri

अन्तोदात्तमाद्यदात्तमुदात्तमनुदात्त
नीचस्वरितम् ।
मध्योदात्तं स्वरितं द्व्युदात्तं
त्र्युदात्तमिति नवपदशय्या ॥ ४५ ॥
अग्निः सोमः प्र वो वीर्यं हविषां
स्वर्बृहस्पतिरिन्द्राबृहस्पती ।
अग्निरित्यन्तोदात्तं सोमइत्याद्युदात्तं
प्रेत्युदात्तं व इत्यनुदात्तं
वीर्यं नीचस्वरितम्
हविषां मध्योदात्तम्
स्वरितिस्वरितं बृहस्पतिरिति
द्व्युदात्तमिन्द्राबृहस्पतीइति त्र्युदात्तम् ॥
अनुदात्तो हृदि ज्ञेयो मूर्ध्न्युदात्त उदाहृतः ।
स्वरितः कर्णमूलीयः सर्वास्ये प्रचयः स्मृतः ॥ ४६ ॥
चाषस्तु वदते मात्रां द्विमात्रं चैव वायसः ।
शिखी रौति त्रिमात्रं तु नकुलस्त्वर्द्धमात्रकम् ॥ ४७ ॥
कुतीर्थादागतं दग्धमपवर्णं च भक्षितम् ।
न तस्य पाठे मोक्षोऽस्ति पापाहेरिव किल्बिषात् ॥ ४८ ॥

---

४५ ॥ ४६ ॥ ४७ ॥ ४८ ॥ ४९ ॥ ५० ॥ ५१ ॥
५२ ॥ ५३ ॥

CC-0 Pt. Chakradhar Joshi and Sons, Dev Prayag. Digitized by eGangotri

सुतीर्थादागतं व्यक्तं साम्नायं सुव्यवस्थितम् ।
सुस्वरेण सुवक्त्रेण प्रयुक्तं ब्रह्म राजते ॥ ४९ ॥
मन्त्रो हीनः स्वरतो वर्णतो वा
मिथ्याप्रयुक्तो न तमर्थमाह ।
स वाग्वज्रो यजमानं हिनस्ति
यथेन्द्रशत्रुः स्वरतोऽपराधात् ॥ ५० ॥
अवक्षरमनायुष्यं निस्वरं व्याधिपीडितम् ।
अक्षता शास्त्ररूपेण वज्रं पतति मस्तके ॥ ५१ ॥
हस्तहीनं तु योऽधीते स्वरवर्णविवर्जितम् ।
ऋग्यजुःसामभिर्दग्धो वियोनिमधिगच्छति ॥ ५२ ॥
हस्तेन वेदं योऽधीते स्वरवर्णार्थसंयुतम् ।
ऋग्यजुःसामभिः पूतो ब्रह्मलोके महीयते ॥ ५३ ॥
शङ्करः शाङ्करीं प्रादाद्दाक्षीपुत्राय धीमते ।
वाङ्मयेभ्यः समाहृत्य देवीं वाचमिति स्थितिः ॥ ५४ ॥
येनाक्षरसमाम्नायमधिगम्य महेश्वरात् ।

इदानीं गुरुपूर्वक्रममाह ॥

शङ्कर इति । शङ्करः सुखकरः शाङ्करीं सुखकरीं विद्यां दाक्षीपुत्राय ऋषये दाक्षीनाम्नी ऋषिकन्या तत्पुत्राय प्रदाद्दत्तवान् धीमते बुद्धिमते ॥ ५४ ॥

सम्प्रति पाणिनिस्तुतिपरं श्लोकमाह ॥

येनेति । येनाक्षरसमाम्नायं ... पाणिनेर्व्याकरणकरणं ... (partly obscured)

CC-0 Pt. Chakradhar Joshi and Sons, Dev Prayag. Digitized by eGangotri

कृत्स्नं व्याकरणं प्रोक्तं तस्मै पाणिनये नमः ॥ ५५ ॥
येन धौता गिरः पुंसां विमलैः शब्दवारिभिः ।
तमश्चाज्ञानजं भिन्नं तस्मै पाणिनये नमः ॥ ५६ ॥
त्रिनयनमुखनिःसृतामिमां
य इह पठेत् प्रयतः सदा द्विजः ।
स भवति धनधान्यकीर्तिमान्
सुखमतुलं च समश्नुते दिवीति ॥ ५७ ॥

इति *पाणिनीयशिक्षा समाप्ता ॥

श्री लक्ष्मीधर-विद्यामन्दिर,

मुच्यते । अचोऽस्पृष्टा यणस्त्वीषदिति प्रत्याहारैः शिक्षा ग्रथिता प्रत्याहाराश्च पाणिनिना शङ्करादधिगम्य व्याकरणं प्रोक्तं शिष्योपकाराय स्वप्रत्याहाराल्लोके प्रवर्तिताः तदर्था स्तुतिः । अक्षरसमाम्नायमिति प्रत्याहारानाहुः ऋज्वन्यत् ॥ ५५ ॥ ५६ ॥

भगवतः साक्षात् स्तुतिपरं श्लोकमाह ॥

त्रिनयनेति । वैतालीयं छन्दोऽस्य त्रिनयनमुखान्निःसृता यथा गुहायाः सिंहो निष्क्रामति तथा निःसृता एतावता त्रिनयनेनापि न कृतेत्यर्थः, तां यः पठेदधीयीत स धनादिभिर्युज्यते सुखमतुलं परमानन्दं च मोक्षमुक्तप्रकारेणाश्नुते प्राप्नोति स्वर्गादीनि परिमितकालत्वात् तोलयितुं शक्यन्ते मोक्षाख्यं तु अपरिमितकालावच्छिन्नं सुखरूपमित्यर्थः ॥ ५७ ॥ इति पाणिनीयशिक्षाभाष्यं सम्पूर्णम् ॥

---

* पाणिनीयमतानुसारिणी श्रीपिङ्गलाचार्यविरचिता—पा० ३ । युक्तोऽप्ययं पाठः । अथ शिक्षां प्रवक्ष्यामि पाणिनीयं मतं यथेति प्रथमश्लोकदर्शनात् ।

CC-0 Pt. Chakradhar Joshi and Sons, Dev Prayag. Digitized by eGangotri

CC-0 Pt. Chakradhar Joshi and Sons, Dev Prayag. Digitized by eGangotri

List of Books.

	Rs.	As.	P.
Dr. Ballantyne's English Primer	0	1	0
English Translation of Baital Pachisi	0	8	0
Anglo-Hindi Dialogue	0	4	0
Sanskrit and English Dictionary by Pandit Ramjasan...	8	0	0
संस्कृतपरिचायिका	०	१	०
साङ्ख्यतत्त्वकौमुदी मूल	०	८	०
विहारी की सतसई संस्कृत दोहा और संस्कृत टीका सहित	१	८	०
मांसामृतव्यवस्था	०	२	०
लघुकौमुदी भाषा टीका सहित १ खण्ड	१	०	०
व्याकरणकौमुदी (A Sanskrit Grammar in Hindi) ...	१	०	०
आशुबोधव्याकरण	३	४	०
मञ्जूषा	२	०	०
भामती प्रत्येक खण्ड	०	१२	०
सिद्धान्तकौमुदी सरला सहित	११	०	०
षटोपनिषद् मूल	०	६	०
ईशाद्युपनिषद् ६ सभाष्य	५	०	०
छान्दोग्योपनिषद् सभाष्य	५	०	०
दत्तकमीमांसा	०	[illegible]	[illegible]
मेदिनीकोश	१	[illegible]	[illegible]
शब्दार्थरत्न	०	[illegible]	[illegible]
उणादिसूत्र	२	[illegible]	[illegible]
अनुमानचिन्तामणि दीधिति सहित ...	४	[illegible]	[illegible]
उत्तररामचरित	१	[illegible]	[illegible]
कुमारसंभव उत्तरार्द्ध	०	[illegible]	[illegible]
पञ्चाङ्ग बापूदेवशास्त्री का बनाया	०	[illegible]	[illegible]
हितोपदेश भाषा टीका सहित	२	[illegible]	[illegible]
पाखण्डविडम्बन नाटक भाषा	०	[illegible]	[illegible]
चन्द्रावली नाटिका ,, ...	०	[illegible]	[illegible]
क्षेत्रकौमुदी ... ,, ...	०	६	०

इन से अधिक संस्कृत अंग्रेजी आदि पुस्तकों का सूचीपत्र पृथक् मुद्रित हुआ है जिन को अपेक्षित हो हमारे पास लिखैं।

BRAJ B. DAS & CO.,
New Road, North of the Chauk,
BENARES.

CC-0 Pt. Chakradhar Joshi and Sons, Dev Prayag. Digitized by eGangotri